# मोहमुद्गर:

*कवितेयं जगद्गुरुशङ्कराचार्यविरचितात् मोहमुद्गरशीर्षकात् संगृहीता, सती शिवगुरुः चेति अनयोः सुतः आचार्यः शङ्करः केरलराज्यस्य कालाडिग्रामे अजायत । आचार्यः शङ्करः मोहमुद्गरमाध्यमेन मानवोद्धारस्य सरलम् उपायं वर्णितवान् । संप्रति चपलमतयः विद्यार्थिनः भौतिकसुखलाभाय सततं यतन्ते । अतः तेषाम् आध्यात्मिकज्ञानविकाशाय मोहविनाशाय च पद्यभागोऽयम् उपकारकः नूनं भविष्यति इति धियात्र प्रस्तुतः ।*

मूढ़ जहीहि धनागमतृष्णां, कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं, वित्तं तेन विनोदय चित्तम् ।१।

नलिनीदलगतजलमतितरलं, तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं, लोकं शोकहतं च समस्तम् ।२।

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ।३।

मा कुरु धनजनयौवनगर्वं, हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ।४।

दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ।५।

अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ।६।

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे, कृपयापारे पाहि मुरारे ।७।

अर्थमनर्थं भावय नित्यं, नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ।८।

कुरुते गङ्गासागरगमनं, व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन, मुक्तिं न भजति जन्मशतेन ।९।

कामं क्रोधं लोभं मोहं, त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढ़ास्ते पच्यन्ते नरकनिगूढ़ाः ।१०।

**(जगद्गुरुः आचार्यः शङ्करः)**

## अन्वयाः

1. हे मूढ़ ! मनसि वितृष्णां धनागमतृष्णां जहीहि । सद्बुद्धिं कुरु । निजकर्मोपात्तं वित्तं यल्लभसे तेन चित्तं विनोदय ।
2. नलिनीगतजलं (यथा) अतितरलं तद्वत् जीवितम् अतिशयचपलं (भवति) (त्वम्) व्याध्यभिमानग्रस्तं शोकहतं समस्तं लोकं च विद्धि ।
3. ते (तव) का कान्ता, ते कः पुत्रः, अयं संसारः अतीव विचित्रः । हे भ्रातः ! यदिदं त्वं कस्य कः, त्वं कुतः आयातः, तत् चिन्तय ।
4. धनजनयौवनगर्वं मा कुरु, कालः सर्वं निमेषात् हरति । त्वम् इदम् अखिलं मायामयं विदित्वा हित्वा ब्रह्मपदं प्रविश ।
5. दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः कालः क्रीडति आयुर्गच्छति, तदपि आशावायुः (जीवः) न मुञ्चति ।
6. अङ्गं गलितं (भवति) मुण्डं पलितं (भवति) तुण्डं दशनविहीनं जातम् (भवति) वृद्धो दण्डं गृहीत्वा याति, तदपि (सः) आशापिण्डं न मुञ्चति ।
7. (जीवानां) पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनं (भवति) (हे) मुरारे ! कृपया अपारे बहुदुस्तारे इहससांरे (नः) पाहि ।
8. (त्वम्) अर्थम् अनर्थं नित्यं भावय, ततः सुखलेशः नास्ति (एतत्) सत्यम्, धनभाजां पुत्रात् अपि भीतिः (भवति) सर्वत्र एषा रीतिः विहिता ।
9. गङ्गासागरगमनं व्रतपरिपालनम् अथवा दानं कुरुते तथापि ज्ञानविहीनः जन्मशतेन सर्वमतेन मुक्तिं न भजति ।
10. कामं-क्रोधं लोभं मोहं त्यक्त्वा आत्मानं कोऽहम् (इति) भावय, (ये) नरकनिगूढाः आत्मज्ञानविमूढाः ते पच्यन्ते ।

## टिप्पणी :

जहीहि – ତ୍ୟାଗ କର । विद्धि - ଜାଣ । कान्ता - ପତ୍ନୀ । दिनयामिन्यौ - ଦିନରାତି । पलितम्- पल् + क्त (पक्वम्) । तुण्डम् - ମୁଖ। जननम् - ଜନ୍ମ । जननीजठरे - ମାତୃଗର୍ଭରେ। भावय- ଚିନ୍ତାକର । विहिता - ସଂପନ୍ନ । मूढाः - ମୂର୍ଖମାନେ विनोदय - ଖୁସୀ କରାଅ, ଆନନ୍ଦ ଉପଲବ୍ଧି କର ।

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) किं हित्वा केन चित्तविनोदनं करणीयम् ?
(ख) कथं समस्तलोकं शोकहतं विद्धि ?
(ग) शङ्करमतेन कुत्र कथं प्रवेष्टव्यम् ?
(घ) कालस्य क्रीडया किं भवति ?
(ङ) कीदृशः वृद्धः आशापिण्डं न मुञ्चति ?
(च) जन्ममरणविषये शङ्करस्य मतं किम् ?
(छ) सर्वत्र का रीतिः विहिता ?
(ज) के कुत्र कथं पच्यन्ते ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) जीवितं कीदृशं भवति ?
(ख) कोऽयम् अतीव विचित्रः ?
(ग) कः सर्वं हरति ?
(घ) वृद्धः कथं याति ?
(ङ) कुत्र सुखलेशः नास्ति ?
(च) कः मुक्तिं न भजति ?
(छ) समस्तं लोकं कीदृशं विद्धि ?
(ज) वृद्धस्य मुण्डं कीदृशं भवति ?
(झ) कः क्रीडति ?

**3. वाक्यरचनां कुरु ।**

कुरु, मनसि, भ्रातः, कस्य, हरति, सर्वत्र ।

**4. सन्धिं कुरुत ।**

अति + इव, संसारः + अयम्, गच्छति + आयुः, वृद्धः + याति, पुनः + अपि, तत् + अपि ।

**5. सन्धिविच्छेदं कुरुत ।**

यल्लभसे, पुनरायातः, कस्ते, मुञ्चत्याशावायुः नास्ति, सर्वत्रैषा, पुत्रादपि, कोऽहम् ।

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) शोकहतम् (शोकेन हतः तम्, शोकात् हतम्, शोकाय हतम्) ।

(ख) जनन्याः जठरं तस्मिन् (जननीजठरः, जननीजठरे, जननीजठरेण) ।

(ग) दशनविहीनम् (पञ्चमीतत्पुरुषः, तृतीयातत्पुरुषः, कर्मधारयः) ।

(घ) शिशिरः च वसन्तः च (शिशिरवसन्तः, शिशिरवसन्तौ, शिशिरवसन्तम्) ।

(ङ) आशापिण्डम् (आशायाः पिण्डः तम्, आशायां पिण्डः तम्, आशया पिण्डः तम्) ।

(च) सर्वेषां मतं तेन (सर्वमतेन, सर्वमतम्, सर्वमतम्) ।

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) बुद्धिम् = बुध् + ——— । (क्त, क्तिन् , शतृ)

(ख) हतम् = ——— + क्त । (हा, हन् , हि )

(ग) हित्वा = ——— + क्त्वा । (हा, हन् , धा)

(घ) विहिता = वि + ——— + क्त । (हा, हन् , धा)

(ङ) विदित्वा = विद् + ——— । (क्त, क्त्वा, शतृ)

(च) जातम् = ——— + क्त । (जि, या, जन्)

(छ) गृहीत्वा = ——— + क्त्वा । (गृह्, ग्रह्, गृ)

(ज) मरणम् = ——— + ल्युट् । (मृ, मुर्, मृक्ष्)

(झ) जननम् = जन् + ——— । (क्त, शानच्, ल्युट्)

(ञ) भीतिः = भी + ——— । (क्तिन्, क्त, क्त्वा)

(ट) मुक्तिम् = ——— + क्तिन् । (मुड्, मुच्, मुद्)